"व्यवधावपि वा विधोः कलां
मृडचूडानिलयां न वेद कः ॥")

व्यवसायः, पुं, ( वि+अव+सो+घञ् । ) उपजीविका । पेशा इति पारस्यभाषा । यथा,—
"करोति नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेव स्याद्यद्विधेर्मनसि स्थितम् ॥"
इति हितोपदेशे २ परिच्छेदः ॥
अपि च ।
"आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥"
इति चाणक्यशतकम् ॥
अनुष्ठानम् । इति व्यवसायिशब्दार्थदर्शनात् ॥ ( यथा, रामायणे । २ । ३० । ४१ ।
"सर्व्वथा सदृशं सीते ! मम स्वस्य कुलस्य च ।
व्यवसायमनुक्रान्ता कान्ते ! त्वमतिशोभनम् ॥")
निश्चयः । यथा,—
"व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥"
इति भगवद्गीतायाम् २ अध्यायः ॥
व्यवसायात्मिकेति । इह ईश्वराराधनलक्षणे कर्म्मयोगे व्यवसायात्मिका परमेश्वरभक्त्यैव ध्रुवं तरिष्यामीति निश्चयात्मिका एकैव एकनिष्ठैव बुद्धिर्भवति । अव्यवसायिनामीश्वराराधनबहिर्मुखानां कामिनां कामनानन्त्यादनन्तास्तथापि कर्म्मफल-गुणफलत्वादि-प्रकारभेदाद्बहुशाखाश्च बुद्धयो भवन्ति । इति तट्टीकायां स्वामी ॥ विष्णुः । यथा,—
"व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।"
इति महाभारते तस्य सहस्रनामस्तोत्रे । १३ । १४९ । ५५ । (महादेवः । यथा, तत्रैव । १३ । १७ । ५० ।
"महाहस्तो विजयो व्यवसायो ह्यतन्द्रितः ॥")

व्यवसायी, [ न् ] त्रि, ( व्यवसायोऽस्यास्तीति । इनिः । ) व्यवसायविशिष्टः । वाणिज्यकारकः । यथा,—
"कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥"
इति चाणक्यशतकम् ॥
अनुष्ठाता । यथा,—
"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥"
इति मानवे १२ अध्यायः ॥
अज्ञेभ्य इति । उभयोः प्रशस्तत्वे सति अन्यतरस्यातिशयविवक्षया श्रेष्ठतेति हीनोविधानादीषदध्ययना अज्ञाः तेभ्यः समग्रग्रन्थाध्येतारः श्रेष्ठाः । तेभ्योऽधीतग्रन्थधारणसमर्थाः श्रेष्ठाः । तेन ग्रन्थिनः पठितविस्मृतग्रन्था बोद्धव्याः । धारिभ्योऽधीतग्रन्थार्थज्ञाः प्रशस्ताः । तेभ्योऽनुष्ठातारः । इति तट्टीकायां कुल्लूकभट्टः ॥

व्यवसितः, त्रि, ( वि+अव+सो+क्तः । ) प्रतारितः । इति भूरिप्रयोगः ॥ अनुष्ठितः । निश्चितः । इति व्यवसायिव्यवसायशब्दार्थदर्शनात् ॥ ( यथा, रामायणे । २ । २३ । १ ।
"तं समीक्ष्य व्यवसितं पितुर्निर्देशपालने ।
कौशल्या वाष्पसंरुद्धा वचो धर्म्मिष्ठमब्रवीत् ॥")

व्यवस्था, स्त्री, ( वि+अव+स्था+"आतश्चोपसर्गे ।" इत्यङ् । ततष्टाप् । ) शास्त्रनिरूपितविधिः । यथा,—
"दीर्घकालं ब्रह्मचर्य्यं धारणञ्च कमण्डलोः ।
देवरेण सुतोत्पत्तिर्दत्तकन्या प्रदीयते ॥"
इत्यादीन्यभिधाय ।
"एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्ब्बकं बुधैः ॥"
इत्युद्वाहतत्त्वे हेमाद्रिपराशरभाष्ययोरादिपुराणम् ॥ ( नियमः । यथा, कथासरित्सागरे । १०८ । ७१ ।
"एवं हतगुहारक्षो महारण्यानि शङ्करः ।
उत्पाद्य भगवांस्तत्र व्यवस्थामादिदेश सः ॥")

व्यवस्थानः, पुं, विष्णुः । यथा,—
"व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।"
इति महाभारते तस्य सहस्रनामस्तोत्रे । १३ । १४९ । ५५ ॥ ( वि+अव+स्था+ल्युट् । ) व्यवस्थितौ, स्त्री । यथा,—
"चातुर्व्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते ।
तं म्लेच्छदेशं जानीयादार्य्यावर्त्तस्ततः परम् ॥"
इत्यार्य्यावर्त्तशब्दटीकायां भरतः ॥

व्यवस्थितः, त्रि, (वि+अव+स्था+क्तः ।) विधिपूर्ब्बकस्थितः । व्यवस्थापितः । यथा,—
"अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

व्यवहर्त्ता, [ ऋ ] पुं, ( वि+अव+हृ+तृच् । ) व्यवहारकर्त्ता । प्राड्विवाक इति यावत् । यथा । उत्तराभिधानानन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादिति परामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानात् व्यवहर्त्तृसम्बन्धाभावाच्च न व्यवहारपादत्वमिति स्थितम् । इति मिताक्षरायां व्यवहारमातृका ॥ कायस्थोपाधिविशेषश्च ॥

व्यवहारः, पुं, (वि+अव+हृ+घञ् ।) विवादः । इत्यमरः ॥ वृक्षभेदः । न्यायः । पणः । स्थितिः । इति मेदिनीशब्दरत्नावल्यौ ॥ ● ॥ ( कर्म्म । क्रिया । यथा,—
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा ॥"
यथा च रघुः । ३ । ६२ ।
"तथापि शस्त्रव्यवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः ।
तुतोष वीर्य्यातिशयेन वृत्रहा
पदं हि सर्व्वत्र गुणैर्निधीयते ॥")
अथ व्यवहारदर्शनम् । तत्र याज्ञवल्क्यः ।
"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥"
स्मृतिसदाचारबहिर्भूतेन वर्त्मना परैरर्थतः शरीरतो वा पीड़ितश्चेद्राजनि निवेदयेत्तद्व्यवहारदर्शनस्थानम् । चेदित्यत्र यदिति मैथिलाः । आवेदयति चेदित्यनेन स्वयं विवादोत्थापनं राज्ञा न कर्त्तव्यमिति शूलपाणिमहामहोपाध्यायाः । राज्ञेति व्यवहारप्रदर्शकपरम् । तथा च बृहस्पतिः ।
"राजा कार्य्याणि संपश्येत् प्राड्विवाकोऽथवा द्विजः ॥" ● ॥
प्राड्विवाकलक्षणमाह स एव ।
"विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
प्रियपूर्ब्बं प्राग्वदति प्राड्विवाकस्ततः स्मृतः ॥"
कात्यायनः ।
"व्यवहाराश्रितं प्रश्नं पृच्छति प्राडिति स्थितिः ।
विवेचयति यस्तस्मिन् प्राड्विवाकस्ततः स्मृतः ॥"
अर्थिनं प्रति भाषा ते कीदृशी प्रत्यर्थिनं प्रति च तथापि कीदृशमुत्तरं इति पृच्छतीति प्राट् श्रुत्वा च युक्तायुक्तत्वेन जयं पराजयं वा विविनक्ति इति विवाकः प्राट् च स विवाकश्चेति प्राड्विवाकः ॥ ● ॥ कात्यायनः ।
"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
स्वयं स राजा विमृशेत्तेषां जयपराजयौ ॥
यदा कार्य्यवशाद्राजा न पश्येत् कार्य्यनिर्णयम् ।
तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं वेदपारगम् ॥
यदि विप्रो न विद्वान् स्यात् क्षत्त्रियं तत्र योजयेत् ।
वैश्यं वा धर्म्मशास्त्रज्ञं शूद्रं यत्नेन वर्ज्जयेत् ॥"
स विनीतवेशः । मनुः ।
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥
नाध्यापयति नाधीते स ब्राह्मणब्रुवः स्मृतः ॥"
व्यासः ।
"द्विजान् विहाय यः पश्येत् कार्य्याणि वृषलैः सह ।
तस्य प्रक्षुभ्यते राज्यं बलं कोषश्च नश्यति ॥
यः शूद्रो वैदिकं धर्म्मं स्मार्त्तं वा भाषते यदि ।
तस्य दण्डं हि सहस्रं जिह्वां चैव भेदयेत् ।
दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः ।
दुग्धां गां कः परित्यज्यार्च्चयेत् शीलवतीं खरीम् ॥"
व्यवहारमाह कात्यायनः ।
"वि नानार्थेऽव सन्देहे हरणं हार उच्यते ।
नानासन्देहहरणाद्व्यवहार इति स्थितिः ॥"
नानाविवादविषयः संशयो ह्रियतेऽनेन इति व्यवहारः । भाषोत्तरक्रियानिर्णायकत्वं व्यवहारत्वम् । तथा च बृहस्पतिः ।
"अज्ञानतिमिरोपेतान् सन्देहपटलावृतान् ।
निरामयान् यः कुरुते शास्त्राञ्जनशलाकया ॥
इह कीर्त्तिं राजपूजां लभते स्वर्गतिञ्च सः ।
तस्मात् संशयच्छिन्नानां सर्व्वदाच विनिर्णयः ॥"
अतएव नारदः ।